# shrIGanadhyakSha Stotram by IkShvAku

# શ્રીગણાધ્યક્ષસ્તોત્રં ઇક્ષ્વાકુકૃત

## Document Information

Text title : gaNAdhyakShastotram IkShvAkukRita narasiMhapurANe

File name : gaNAdhyakShastotramIkShvAkuNP.itx

Category : ganesha, stotra

Location : doc_ganesha

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 25 1-25

Latest update : June 9, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીગણાધ્યક્ષસ્તોત્રં ઈક્ષ્વાકુકૃત

ભરદ્વાજ ઉવાચ
કથં સ્તુતો ગણાધ્યક્ષસ્તેન રાજ્ઞા મહાત્મના ।
યથા તેન તપસ્તપ્તં તન્મે વદ મહામતે ॥ ૧॥

સૂત ઉવાચ
ચતુર્થીદિવસે રાજા સ્નાત્વા ત્રિષવણં દ્વિજ ।
રક્તામ્બરધરો ભૂત્વા રક્તગન્ધાનુલેપનઃ ॥ ૨॥

સુરક્તકુસુમૈર્હૃદ્યૈર્વિનાયકમથાર્ચયત્ ।
રક્તચન્દનતોયેન સ્નાનપૂર્વં યથાવિધિ ॥ ૩॥

વિલિપ્ય રક્તગન્ધેન રક્તપુષ્પૈઃ પ્રપૂજયત્ ।
તતોઽસૌ દત્તવાન્ ધૂપમાજ્યયુક્તં સચન્દનમ્ ।
નૈવેદ્યં ચૈવ હારિદ્રં ગુડખણ્ડઘૃતપ્લુતમ્ ॥ ૪॥

એવં સુવિધિના પૂજ્ય વિનાયકમથાસ્તવીત્ ।
ઇક્ષ્વાકુરુવાચ
નમસ્કૃત્ય મહાદેવં સ્તોષ્યેઽહં તં વિનાયકમ્ ॥ ૫॥

મહાગણપતિં શૂરમજિતં જ્ઞાનવર્ધનમ્ ।
એકદન્તં દ્વિદન્તં ચ ચતુર્દન્તં ચતુર્ભુજમ્ ॥ ૬॥

ત્ર્યક્ષં ત્રિશૂલહસ્તં ચ રક્તનેત્રં વરપ્રદમ્ ।
આમ્બિકેયં શૂર્પકર્ણં પ્રચણ્ડં ચ વિનાયકમ્ ॥ ૭॥

આરક્તં દણ્ડિનં ચૈવ વહ્નિવક્ત્રં હુતપ્રિયમ્ ।
અનર્ચિતો વિઘ્નકરઃ સર્વકાર્યેષુ યો નૃણામ્ ॥ ૮॥

તં નમામિ ગણાધ્યક્ષં ભીમમુગ્રમુમાસુતમ્ ।
મદમત્તં વિરૂપાક્ષં ભક્તિવિઘ્નનિવારકમ્ ॥ ૯॥

સૂર્યકોટિપ્રતીકાશં ભિન્નાઞ્જનસમપ્રભમ્ ।
બુદ્ધં સુનિર્મલં શાન્તં નમસ્યામિ વિનાયકમ્ ॥ ૧૦॥

નમોઽસ્તુ ગજવક્ત્રાય ગણાનાં પતયે નમઃ ।
મેરુમન્દરરૂપાય નમઃ કૈલાસવાસિને ॥ ૧૧॥

વિરૂપાય નમસ્તેઽસ્તુ નમસ્તે બ્રહ્મચારિણે ।
ભક્તસ્તુતાય દેવાય નમસ્તુભ્યં વિનાયક ॥ ૧૨॥

ત્વયા પુરાણ પૂર્વેષાં દેવાનાં કાર્યસિદ્ધયે ।
ગજરૂપં સમાસ્થાય ત્રાસિતાઃ સર્વદાનવાઃ ॥ ૧૩॥

ઋષીણાં દેવતાનાં ચ નાયકત્વં પ્રકાશિતમ્ ।
યતસ્તતઃ સુરૈરગ્રે પૂજ્યસે ત્વં ભવાત્મજ ॥ ૧૪॥

ત્વામારાધ્ય ગણાધ્યક્ષં સર્વજ્ઞં કામરૂપિણમ્ ।
કાર્યાર્થં રક્તકુસુમૈ રક્તચન્દનવારિભિઃ ॥ ૧૫॥

રક્તામ્બરધરો ભૂત્વા ચતુર્થ્યામર્ચયેજ્જપેત્ ।
ત્રિકાલમેકકાલં વા પૂજયેન્નિયતાશનઃ ॥ ૧૬॥

રાજાનં રાજપુત્રં વા રાજમન્ત્રિણમેવ વા ।
રાજ્યં ચ સર્વવિઘ્નેશ વશં કુર્યાત્ સરાષ્ટ્રકમ્ ॥ ૧૭॥

અવિઘ્નં તપસો મહ્યં કુરુ નૌમિ વિનાયક ।
મયેત્થં સંસ્તુતો ભક્ત્યા પૂજિતશ્ચ વિશેષતઃ ॥ ૧૮॥

યત્ફલં સર્વતીર્થેષુ સર્વયજ્ઞેષુ યત્ફલમ્ ।
તત્ફલં પૂર્ણમાપ્નોતિ સ્તુત્વા દેવં વિનાયકમ્ ॥ ૧૯॥

વિષમં ન ભવેત્ તસ્ય ન ચ ગચ્છેત્ પરાભવમ્ ।
ન ચ વિઘ્નો ભવેત્ તસ્ય જાતો જાતિસ્મરો ભવેત્ ॥ ૨૦॥

ય ઇદં પઠતે સ્તોત્રં ષડ્ભિર્માસૈર્વરં લભેત્ ।
સંવત્સરેણ સિદ્ધિં ચ લભતે નાત્ર સંશયઃ ॥ ૨૧॥

સૂત ઉવાચ
એવં સ્તુત્વા પુરા રાજા ગણાધ્યક્ષં દ્વિજોત્તમ ।
તાપસં વેષમાસ્થાય તપશ્ચર્તું ગતો વનમ્ ॥ ૨૨॥

ઉત્સૃજ્ય વસ્ત્રં નાગત્વક્સદૃશં બહુમૂલ્યકમ્ ।

કઠિનાં તુ ત્વચં વાક્ષીં કટ્યાં ધત્તે નૃપોત્તમઃ ॥ ૨૩॥

તથા રત્નાનિ દિવ્યાનિ વલયાનિ નિરસ્ય તુ ।
અક્ષસૂત્રમલઙ્કારં ફલૈઃ પદ્મસ્ય શોભનમ્ ॥ ૨૪॥

તથોત્તમાઙ્ગે મુકુટં રત્નહાટકશોભિતમ્ ।
ત્યક્ત્વા જટાકલાપં તુ તપોઽર્થે વિભૃયાન્નૃપઃ ॥ ૨૫॥

ઇતિ ।

નરસિંહપુરાણ અધ્યાય ૨૫ શ્લોકસંખ્યા ૭૨
શ્રીનરસિંહપુરાણે ઇક્ષ્વાકુચરિતે પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨૫॥

From Narasimhapurana adhyAya 25
https://archive.org/details/NarsimhaPuranGitapress
Proofread by Singanallur Ganesan singanallur at gmail.com

---

*shrIGanadhyakSha Stotram by IkShvAku*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*